श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ पञ्चविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चविंशः सर्गः ॥

## राक्षसानामाक्रमणं श्रीरामेण तेषां संहारश्च

अवष्टब्धधनुं रामं क्रुद्धं तं रिपुघातिनम्।
ददर्शाश्रममागम्य खरः सह पुरःसरैः॥ **3.25.1** ॥

तं दृष्ट्वा सगुणं चापमुद्यम्य खरनिःस्वनम्।
रामस्याभिमुखं सूतं चोद्यतामित्यचोदयत्॥ **3.25.2** ॥

स खरस्याज्ञया सूतस्तुरगान् समचोदयत्।
यत्र रामो महाबाहुरेको धुन्वन् धनुः स्थितः॥ **3.25.3** ॥

तं तु निष्पतितं दृष्ट्वा सर्वतो रजनीचराः।
मुञ्चमाना महानादं सचिवाः पर्यवारयन्॥ **3.25.4** ॥

स तेषां यातुधानानां मध्ये रथगतः खरः।
बभूव मध्ये ताराणां लोहिताङ्ग इवोदितः॥ **3.25.5** ॥

ततः शरसहस्रेण राममप्रतिमौजसम्।
अर्दयित्वा महानादं ननाद समरे खरः॥ **3.25.6** ॥

ततस्तं भीमधन्वानं क्रुद्धाः सर्वे निशाचराः।
रामं नानाविधैः शस्त्रैरभ्यवर्षन्त दुर्जयम्॥ **3.25.7** ॥

मुद्गरैरायसैः शूलैः प्रासैः खड्गैः परश्वधैः।
राक्षसाः समरे शूरं निजघ्नू रोषतत्पराः॥ **3.25.8**॥

ते बलाहकसङ्काशा महाकाया महाबलाः।
अभ्यधावन्त काकुत्स्थं रथैर्वाजिभिरेव च॥ **3.25.9**॥

गजैः पर्वतकूटाभै रामं युद्धे जिघांसवः।
ते रामे शरवर्षाणि व्यसृजन् रक्षसां गणाः॥ **3.25.10**॥

शैलेन्द्रमिव धाराभिर्वर्षमाणा महाघनाः।
सर्वैः परिवृतो रामो राक्षसैः क्रूरदर्शनैः॥ **3.25.11**॥

तिथिष्विव महादेवो वृतः पारिषदां गणैः।
तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः॥ **3.25.12**॥

प्रतिजग्राह विशिखैर्नद्योघानिव सागरः।
स तैः प्रहरणैर्घोरैर्भिन्नगात्रो न विव्यथे॥ **3.25.13**॥

रामः प्रदीप्तैर्बहुभिर्वज्रैरिव महाचलः।
स विद्धः क्षतजादिग्धः सर्वगात्रेषु राघवः॥ **3.25.14**॥

बभूव रामः सन्ध्याभ्रैर्दिवाकर इवावृतः।
विषेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः॥ **3.25.15**॥

एकं सहस्रैर्बहुभिस्तदा दृष्ट्वा समावृतम्।
ततो रामस्तु सङ्क्रुद्धो मण्डलीकृतकार्मुकः॥ **3.25.16**॥

ससर्ज निशितान् बाणाञ्छतशोऽथ सहस्रशः।
दुरावारान् दुर्विषहान् कालपाशोपमान् रणे॥ **3.25.17**॥

मुमोच लीलया कङ्कपत्रान् काञ्चनभूषणान्।
ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया॥ **3.25.18**॥

आददू रक्षसां प्राणान् पाशाः कालकृता इव।
भित्त्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः॥ **3.25.19** ॥

अन्तरिक्षगता रेजुर्दीप्ताग्निसमतेजसः।
असङ्ख्येयास्तु रामस्य सायकाश्चापमण्डलात्॥ **3.25.20** ॥

विनिष्पेतुरतीवोग्रा रक्षःप्राणापहारिणः।
तैर्धनूंषि ध्वजाग्राणि चर्माणि कवचानि च॥ **3.25.21** ॥

बाहून् सहस्ताभरणानूरून् करिकरोपमान्।
चिच्छेद रामः समरे शतशोऽथ सहस्रशः॥ **3.25.22** ॥

हयान् काञ्चनसन्नाहान् रथयुक्तान् ससारथीन्।
गजांश्च सगजारोहान् सहयान् सादिनस्तदा॥ **3.25.23** ॥

चिच्छिदुर्बिभिदुश्चैव रामबाणा गुणच्युताः।
पदातीन् समरे हत्वा ह्यनयद् यमसादनम्॥ **3.25.24** ॥

ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः।
भीममार्तस्वरं चक्रुश्छिद्यमाना निशाचराः॥ **3.25.25** ॥

तत्सैन्यं विविधैर्बाणैरर्दितं मर्मभेदिभिः।
न रामेण सुखं लेभे शुष्कं वनमिवाग्निना॥ **3.25.26** ॥

केचिद् भीमबलाः शूराः प्रासाञ्शूलान् परश्वधान्।
चिक्षिपुः परमक्रुद्धा रामाय रजनीचराः॥ **3.25.27** ॥

तेषां बाणैर्महाबाहुः शस्त्राण्यावार्य वीर्यवान्।
जहार समरे प्राणांश्चिच्छेद च शिरोधरान्॥ **3.25.28** ॥

ते छिन्नशिरसः पेतुश्छिन्नचर्मशरासनाः।
सुपर्णवातविक्षिप्ता जगत्यां पादपा यथा॥ **3.25.29** ॥

अवशिष्टाश्च ये तत्र विषण्णास्ते निशाचराः।
खरमेवाभ्यधावन्त शरणार्थं शराहताः॥ **3.25.30** ॥

तान् सर्वान् धनुरादाय समाश्वास्य च दूषणः।
अभ्यधावत् सुसङ्क्रुद्धः क्रुद्धं क्रुद्ध इवान्तकः॥ **3.25.31** ॥

निवृत्तास्तु पुनः सर्वे दूषणाश्रयनिर्भयाः।
राममेवाभ्यधावन्त सालतालशिलायुधाः॥ **3.25.32** ॥

शूलमुद्गरहस्ताश्च पाशहस्ता महाबलाः।
सृजन्तः शरवर्षाणि शस्त्रवर्षाणि संयुगे॥ **3.25.33** ॥

द्रुमवर्षाणि मुञ्चन्तः शिलावर्षाणि राक्षसाः।
तद् बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम्॥ **3.25.34** ॥

रामस्यास्य महाघोरं पुनस्तेषां च रक्षसाम्।
ते समन्तादभिक्रुद्धा राघवं पुनरार्दयन्॥ **3.25.35** ॥

ततः सर्वा दिशो दृष्ट्वा प्रदिशश्च समावृताः।
राक्षसैः सर्वतः प्राप्तैः शरवर्षाभिरावृतः॥ **3.25.36** ॥

स कृत्वा भैरवं नादमस्त्रं परमभास्वरम्।
समयोजयद् गान्धर्वं राक्षसेषु महाबलः॥ **3.25.37** ॥

ततः शरसहस्राणि निर्ययुश्चापमण्डलात्।
सर्वा दश दिशो बाणैरापूर्यन्त समागतैः॥ **3.25.38** ॥

नाददानं शरान् घोरान् विमुञ्चन्तं शरोत्तमान्।
विकर्षमाणं पश्यन्ति राक्षसास्ते शरार्दिताः॥ **3.25.39** ॥

शरान्धकारमाकाशमावृणोत् सदिवाकरम्।
बभूवावस्थितो रामः प्रक्षिपन्निव ताञ्छरान्॥ **3.25.40** ॥

**युगपत्पतमानैश्च युगपच्च हतैर्भृशम्।**
**युगपत्पतितैश्चैव विकीर्णा वसुधाभवत्॥ 3.25.41॥**

**निहताः पतिताः क्षीणाश्छिन्ना भिन्ना विदारिताः।**
**तत्र तत्र स्म दृश्यन्ते राक्षसास्ते सहस्रशः॥ 3.25.42॥**

**सोष्णीषैरुत्तमाङ्गैश्च साङ्गदैर्बाहुभिस्तथा।**
**ऊरुभिर्बाहुभिश्छिन्नैर्नानारूपैर्विभूषणैः॥ 3.25.43॥**

**हयैश्च द्विपमुख्यैश्च रथैर्भिन्नैरनेकशः।**
**चामरव्यजनैश्छत्रैर्ध्वजैर्नानाविधैरपि॥ 3.25.44॥**

**रामेण बाणाभिहतैर्विच्छिन्नैः शूलपट्टिशैः।**
**खड्गैः खण्डीकृतैः प्रासैर्विकीर्णैश्च परश्वधैः॥ 3.25.45॥**

**चूर्णिताभिः शिलाभिश्च शरैश्चित्रैरनेकशः।**
**विच्छिन्नैः समरे भूमिर्विस्तीर्णाभूद् भयङ्करा॥ 3.25.46॥**

**तान् दृष्ट्वा निहतान् सर्वे राक्षसाः परमातुराः।**
**न तत्र चलितुं शक्ता रामं परपुरञ्जयम्॥ 3.25.47॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चविंशः सर्गः॥